# Vipraih Proktam Kashiyatropadesham

# વિપ્રૈઃ પ્રોક્તં કાશીયાત્રોપદેશમ્

## Document Information

Text title : Vipraih Proktam Kashiyatropadesham

File name : vipraiHproktaMkAshIyAtropadesham.itx

Category : shiva, shivarahasya, tIrthakShetra, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 272-295||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિપ્રૈઃ પ્રોક્તં કાશીયાત્રોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
વિપ્રા ઊચુઃ
યાત્રાદિરતચિત્તાનાં સ્વસ્વધર્મરતાત્મનામ્ ।
કાશીવાસો મુક્તિહેતુર્નાન્યેષાં પૃથિવીપતે ॥ ૨૭૨॥

ઉદ્ધૂલનત્રિપુણ્ડ્રાભ્યાં તથા રુદ્રાક્ષધારણાત્ ।
વિશ્વેશ્વરાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૩॥

(ત્રિપુણ્ડ્રધારણે ભસ્મોદ્ધૂલને શિવપૂજને ।)
(રુદ્રાક્ષધારણે ચાપિ શ્રદ્ધા કાર્યા ત્વયા નૃપ ॥) ૨૭૩॥

જ્ઞાનવાપીજલસ્નાનાત્ જ્ઞાનેશાભ્યર્ચનાદપિ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૪॥

(જ્ઞાનવાપીજલસ્નાને જ્ઞાનેશાભ્યર્ચને તથા ।
વિશ્વેશાભ્યર્ચને ચાપિ કુરુ શ્રદ્ધાં મહીપતે ॥) ૨૭૪॥

ઢુણ્ઢીશપૂજનાત્તદ્વદ્દણ્ડપાણેશ્ચ પૂજનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૫॥

(ઢુણ્ઢીશપૂજને તદ્વદ્દણ્ડપાણેશ્ચ પૂજને ।
વિશ્વેશ્વરાભ્યર્ચને ચ કુરુ શ્રદ્ધાં મહીપતે ॥) ૨૭૫॥

અનન્તભૈરવસ્યાપિ કુમારસ્યાપિ પૂજનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૬॥

(અનન્તભૈરવસ્યાપિ કુમારસ્યાપિ પૂજને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૭૬॥

અવિમુક્તીશ્વરાર્ચાતસ્તથા નન્દીશપૂજનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૭॥

(અવિમુક્તીશ્વરાર્ચાયાં તથા નન્દીશપૂજને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૭૭॥

રુદ્રાધ્યાયજપાત્તદ્વત્પઞ્ચાક્ષરજપાત્તથા ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૮॥

(રુદ્રાધ્યાયજપે તદ્વત્પઞ્ચાક્ષરજપે તથા ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૭૮॥

ભૃઙ્ગીશદર્શનાત્તદ્વત્તારકેશસ્ય પૂજનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૭૯॥

(ભૃઙ્ગીશદર્શને તદ્વત્તારકેશસ્ય પૂજને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૭૯॥

ભવાનીદર્શનાત્તદ્વચ્છિવાશઙ્કરપૂજનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૦॥

(ભવાનીદર્શને તદ્વચ્છિવાશઙ્કરપૂજને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૦॥

વીરકુણ્ડજલસ્નાનાત્ શ્રીવિશ્વેશ્વરદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૧॥

(વીરકુણ્ડજલસ્નાને શ્રીવિશ્વેશ્વરદર્શને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૧॥

આમર્દકેશ્વરાર્ચાતઃ પાપભક્ષેશપૂજનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૨॥

(આમર્દકેશ્વરાર્ચાયાં પાપભક્ષેશપૂજને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૨॥

કાલકુણ્ડજલસ્નાનાત્કાલભૈરવદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૩॥

(કાલકુણ્ડજલસ્નાને કાલભૈરવદર્શને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૩॥

નવગ્રહેશપૂજાતઃ કાલેશાભ્યર્ચનાદપિ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૪॥

(નવગ્રહેશપૂજાયાં કાલેશાભ્યર્ચને તથા ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૪॥

કૃત્તિવાસેશ્વરાર્ચાતઃ શ્રીવિશ્વેશ્વરદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૫॥

(કૃત્તિવાસેશ્વરાર્ચાયાં શ્રીવિશ્વેશ્વરદર્શને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૫॥

શિવગઙ્ગાજલસ્નાનાદાગ્નીધ્રેશ્વરદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૬॥

(શિવગઙ્ગાજલસ્નાનેઽપ્યાગ્નીધ્રેશ્વરદર્શને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૬॥

ઓઙ્કારકુણ્ડસ્નાનાચ્ચ શ્રીમન્દોઙ્કારદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૭॥

(ઓઙ્કારકુણ્ડસ્નાને ચ શ્રીમદોઙ્કુરદર્શને ।
વિશ્વેશ્વરભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૭॥

પિલિપ્પિલજલસ્નાનાત્ ત્રિલોચનસમર્ચનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૮॥

(પિલિપ્પિલજલસ્નાને ત્રિલોચનસમર્ચને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૮॥

સોમેશતીર્થસ્નાનાચ્ચ તથા સોમેશદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૮૯॥

(સોમેશતીર્થસ્નાને ચ તથા સોમેશદર્શને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૮૯॥

કેદારકુણ્ડસ્નાનાચ્ચ તથા કેદારદર્શનાત્ ।
વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૯૦॥

(કેદારકુણ્ડસ્નાને ચ તથા કેદારદર્શને ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૯૧॥

શિવભક્તપ્રણામાચ્ચ શિવભક્તાર્ચનાદપિ ।

વિશ્વેશાભ્યર્ચનાચ્ચ મા મા પ્રમદ ભૂપતે ॥ ૨૯૨॥

(શિવભક્તપ્રણામે ચ શિવભક્તાર્ચને તથા ।
વિશ્વેશ્વરાભ્યર્ચને ચ શ્રદ્ધાં કુરુ મહીપતે ॥) ૨૯૨॥

સર્વદા શિવનામાનિ જપ કાશ્યાં પ્રયત્નતઃ ।
પૂજયસ્વ મહાદેવં સતતં બિલ્વપલ્લવૈઃ ॥ ૨૯૨॥

ભસ્મમુ(નો)દ્ધૂલનં કૃત્વા ત્રિપુણ્ડ્રં ચ તતઃ પરમ્ ।
રુદ્રાક્ષધારણં કૃત્વા જપ મન્ત્રં શિવાત્મકમ્ ॥ ૨૯૩॥

નિત્યયાત્રાઃ પક્ષયાત્રા માસયાત્રાશ્ચ ભૂરિશઃ ।
તથૈવ વારયાત્રાશ્ચ કર્તવ્યાસ્તત્ર સાદરમ્ ॥ ૨૯૪॥

પૂજનીયાઃ પ્રયત્નેન શૈવાઃ કાશીનિવાસિનઃ ।
નિત્યં શિવકથાઃ શ્રાવ્યાઃ શ્રોતવ્યાસ્તત્ર સાદરમ્ ॥ ૨૯૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાપ્રતિ વિપ્રૈઃ પ્રોક્તં કાશીયાત્રોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૨૭૨-૨૯૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 272-295..

Notes:

Vipraḥ વિપ્રાઃ deliver Upadeśa ઉપદેશ (to Rājā રાજા) about the procedures to be followed during Kāśī Yātrā કાશી યાત્રા.

They emphasize about worshipping Viśveśa/Viśveśvara વિશ્વેશ/વિશ્વેશ્વર and mention about sequentially visiting and worshiping at the key spots in Kaśī કાશી viz.

Worshiping Jñāneśa જ્ઞાનેશ after taking bath at Jñānavāpī જ્ઞાનવાપી; worshiping Ḍhuṇḍhīśa ઢુણ્ઢીશ, Daṇḍapāṇi દણ્ડપાણિ, Anantabhairava અનન્તભૈરવ, Kumāra કુમાર, Avimukteśvara અવિમુક્તેશ્વર, Nandīśa નન્દીશ; performing Rudrādhyāya japa રુદ્રાધ્યાય જપ and Pañcākṣara japa પઞ્ચાક્ષર જપ; worshiping Bhṛṅgīśa ભૃઙ્ગીશ, Tārakeśa તારકેશ, Bhavānī ભવાની, Śiva Śaṅkara શિવ શઙ્કર; worshiping Viśveśvara વિશ્વેશ્વર after taking bath at Vīrakuṇḍa વીરકુણ્ડ; worshiping Āmardakeśvara આમર્દકેશ્વર, Pāpabhakṣeśa પાપભક્ષેશ; worshiping Kālabhairava કાલભૈરવ after taking bath at Kālakuṇḍa કાલકુણ્ડ; worshiping Navagraha નવગ્રહ, Kāleśa કાલેશ, Kṛttivāseśvara કૃત્તિવાસેશ્વર, Viśveśvara વિશ્વેશ્વર; worshiping Agnidhreśvara અગ્નિધ્રેશ્વર after taking bath at Śivagaṅgā શિવગઙ્ગા; worshiping Śrīmadoṅkāra શ્રીમદોઙ્કાર after taking

bath at Oṅkārakuṇḍa; ઓઙ્કારકુણ્ડ; worshiping Trilocana ત્રિલોચન after taking bath at Pilippilla પિલિપ્પિલ્લ; worshiping Someśa સોમેશ after taking bath at Someśatīrtha સોમેશતીર્થ; worshiping Kedāra કેદાર after taking bath at Kedārakuṇḍa કેદારકુણ્ડ.
Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

---

*Vipraih Proktam Kashiyatropadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*